# ॥ त्रयोदशोऽध्यायः ॥

ध्यानं
ॐ बालार्क मण्डला भासां चतुर्बाहुं त्रिलोचनां ।
पाशाङ्कुश वराभीतीर् धारयन्तीं शिवां भजे ॥

ॐ ऋषिरुवाच ॥ १॥
एतत्ते कथितं भूप देवी माहात्म्य मुत्तमम् ।
एवं प्रभावा सा देवी ययेदं धार्यते जगत् ॥ २॥

विद्या तथैव क्रियते भगवद्विष्णु मायया ।
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥ ३॥

मोह्यन्ते मोहिताश्चैव मोह मेष्यन्ति चापरे ।
तामुपैहि महाराज शरणं परमेश्वरीम् ॥ ४॥

आराधिता सैव नृणां भोग स्वर्गा पवर्गदा ॥ ५॥

मार्कण्डेय उवाच ॥ ६॥
इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥ ७॥

प्रणिपत्य महाभागं तमृषिं शंसित व्रतम् ।
निर्विण्णोऽति ममत्वेन राज्या पहरणेन च ॥ ८॥

जगाम सद्यस्तपसे स च वैश्यो महामुने ।

सन्दर्शनार्थ मम्बाया नदी पुलिन संस्थितः ॥ ९॥

स च वैश्य स्तप स्तेपे देवीसूक्तं परं जपन् ।
तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ १०॥

अर्हणां चक्रतुस्तस्याः पुष्प धूपाग्नि तर्पणैः ।
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥ ११॥

ददतुस्तौ बलिं चैव निजगात्रा सृगुक्षितम् ।
एवं समाराधयतोस् त्रिभि र्वर्षै र्यतात्मनोः ॥ १२॥

परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥ १३॥

देव्युवाच ॥ १४॥
यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ।
मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥ १५॥

मार्कण्डेय उवाच ॥ १६॥
ततो वव्रे नृपो राज्यं अविभ्रं श्यन्य जन्मनि ।
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ १७॥

सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्ण मानसः ।
ममेत्यह मिति प्राज्ञः सङ्गविच्युति कारकम् ॥ १८॥

देव्युवाच ॥ १९॥
स्वल्पै रहोभि र्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ २०॥

हत्वा रिपू नस्खलितं तव तत्र भविष्यति ॥ २१॥

मृतश्च भूयः सम्प्राप्य जन्म देवा द्विवस्वतः ॥ २२॥

सावर्णिको नाम मनुर् भवान्भुवि भविष्यति ॥ २३॥

वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभि वाञ्छितः ॥ २४॥

तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ २५॥

मार्कण्डेय उवाच ॥ २६॥
इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ।
बभूवान्त र्हिता सद्यो भक्त्या ताभ्या मभिष्टुता ॥ २७॥

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णि र्भविता मनुः ॥ २८॥

॥ क्लीं ॐ ॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
सुरथ वैश्ययो र्वरप्रदानं नाम त्रयोदशोऽध्यायः ॥ १३॥